श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ द्विषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विषष्टितमः सर्गः ॥

## श्रीरामस्य विलापः

सीतामपश्यन् धर्मात्मा शोकोपहतचेतनः।
विललाप महाबाहू रामः कमललोचनः ॥ **3.62.1** ॥

पश्यन्निव च तां सीतामपश्यन्मन्मथार्दितः।
उवाच राघवो वाक्यं विलापाश्रयदुर्वचम् ॥ **3.62.2** ॥

त्वमशोकस्य शाखाभिः पुष्पप्रियतरा प्रिये।
आवृणोषि शरीरं ते मम शोकविवर्धनी ॥ **3.62.3** ॥

कदलीकाण्डसदृशौ कदल्या संवृतावुभौ।
ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुम् ॥ **3.62.4** ॥

कर्णिकारवनं भद्रे हसन्ती देवि सेवसे।
अलं ते परिहासेन मम बाधावहेन वै ॥ **3.62.5** ॥

विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते।
अवगच्छामि ते शीलं परिहासप्रियं प्रिये ॥ **3.62.6** ॥

आगच्छ त्वं विशालाक्षि शून्योऽयमुटजस्तव।
सुव्यक्तं राक्षसैः सीता भक्षिता वा हृतापि वा ॥ **3.62.7** ॥

न हि सा विलपन्तं मामुपसम्प्रैति लक्ष्मण।
एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण॥ **3.62.8** ॥

शंसन्तीव हि मे देवीं भक्षितां रजनीचरैः।
हा ममार्ये क्व यातासि हा साध्वि वरवर्णिनि॥ **3.62.9** ॥

हा सकामाद्य कैकेयी देवि मेऽद्य भविष्यति।
सीतया सह निर्यातो विना सीतामुपागतः॥ **3.62.10** ॥

कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं मम।
निर्वीर्य इति लोको मां निर्दयश्चेति वक्ष्यति॥ **3.62.11** ॥

कातरत्वं प्रकाशं हि सीतापनयनेन मे।
निवृत्तवनवासश्च जनकं मिथिलाधिपम्॥ **3.62.12** ॥

कुशलं परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम्।
विदेहराजो नूनं मां दृष्ट्वा विरहितं तया॥ **3.62.13** ॥

सुताविनाशसन्तप्तो मोहस्य वशमेष्यति।
अथवा न गमिष्यामि पुरीं भरतपालिताम्॥ **3.62.14** ॥

स्वर्गोऽपि हि तया हीनः शून्य एव मतो मम।
तन्मामुत्सृज्य हि वने गच्छायोध्यापुरीं शुभाम्॥ **3.62.15** ॥

न त्वहं तां विना सीतां जीवेयं हि कथञ्चन।
गाढमाश्लिष्य भरतो वाच्यो मद्वचनात् त्वया॥ **3.62.16** ॥

अनुज्ञातोऽसि रामेण पालयेति वसुन्धराम्।
अम्बा च मम कैकेयी सुमित्रा च त्वया विभो॥ **3.62.17** ॥

कौसल्या च यथान्यायमभिवाद्या ममाज्ञया।
रक्षणीया प्रयत्नेन भवता सूक्तचारिणा॥ **3.62.18** ॥

**सीतायाश्च विनाशोऽयं मम चामित्रसूदन।**
**विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत्॥ 3.62.19॥**

**इति विलपति राघवे तु दीने**
**वनमुपगम्य तया विना सुकेश्या।**
**भयविकलमुखस्तु लक्ष्मणोऽपि**
**व्यथितमना भृशमातुरो बभूव॥ 3.62.20॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विषष्टितमः सर्गः॥